# .. indrakRitaM rAmastotram ..

# ॥ ઇન્દ્રકૃતં રામસ્તોત્રમ્ ॥

## Document Information

Text title : indrakRitaM rAmastotram
File name : indraraamastotra.itx
Location : doc_raama
Author : indra
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : http://www.webdunia.com
Proofread by : Kirk Wortman kirkwort at hotmail.com
Description-comments : adhyAtmarAmAyaNa
Latest update : January 8, 2002
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ ઇન્દ્રકૃતં રામસ્તોત્રમ્ ॥

ઇન્દ્ર ઉવાચ
ભજેઽહં સદા રામમિન્દીવરાભં ભવારણ્યદાવાનલાભાભિધાનમ્ ।
ભવાનીહૃદા ભાવિતાનન્દરૂપં ભવાભાવહેતું ભવાદિપ્રપન્નમ્ ॥ ૧॥

સુરાનીકદુઃખૌઘનાશૈકહેતું નરાકારદેહં નિરાકારમીડ્યમ્ ।
પરેશં પરાનન્દરૂપં વરેણ્યં હરિં રામમીશં ભજે ભારનાશમ્ ॥ ૨॥

પ્રપન્નાખિલાનન્દદોહં પ્રપન્નં પ્રપન્નાર્તિનિઃશેષનાશાભિધાનમ્ ।
તપોયોગયોગીશભાવાભિભાવ્યં કપીશાદિમિત્રં ભજે રામમિત્રમ્ ॥ ૩॥

સદા ભોગભાજાં સુદૂરે વિભાન્તં સદા યોગભાજામદૂરે વિભાન્તમ્ ।
ચિદાનન્દકન્દં સદા રાઘવેશં વિદેહાત્મજાનન્દરૂપં પ્રપદ્યે ॥ ૪॥

મહાયોગમાયાવિશેષાનુયુક્તો વિભાસીશ લીલાનરાકારવૃત્તિઃ ।
ત્વદાનન્દલીલાકથાપૂર્ણકર્ણાઃ સદાનન્દરૂપા ભવન્તીહ લોકે ॥ ૫॥

અહં માનપાનાભિમત્તપ્રમત્તો ન વેદાખિલેશાભિમાનાભિમાનઃ ।
ઇદાનીં ભવત્પાદપદ્મપ્રસાદાત્ત્રિલોકાધિપત્યાભિમાનો વિનષ્ટઃ ॥ ૬॥

સ્ફુરદ્રત્નકેયૂરહારાભિરામં ધરાભારભૂતાસુરાનીકદાવમ્ ।
શરચ્ચન્દ્રવક્ત્રં લસત્પદ્મનેત્રં દુરાવારપારં ભજે રાઘવેશમ્ ॥ ૭॥

સુરાધીશનીલાભ્રનીલાઙ્ગકાન્તિં વિરાધાદિરક્ષોવધાલ્લોકશાન્તિમ્ ।
કિરીટાદિશોભં પુરારાતિલાભં ભજે રામચન્દ્રં રઘૂણામધીશમ્ ॥ ૮॥

લસચ્ચન્દ્રકોટિપ્રકાશાદિપીઠે સમાસીનમઙ્કે સમાધાય સીતામ્ ।
સ્ફુરદ્ધેમવર્ણાં તડિત્પુઞ્જભાસાં ભજે રામચન્દ્રં નિવૃત્તાર્તિતન્દ્રમ્ ॥ ૯॥

॥ ઇતિ શ્રીમદધ્યાત્મરામાયણે યુદ્ધકાણ્ડે ત્રયોદશસર્ગે
ઇન્દ્રકૃતશ્રીરામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Visit http://www.webdunia.com for additional texts with Hindi meanings.

.. indrakRitaM rAmastotram ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*